# Shri Sharada Chatuhshashtih

# શ્રીશારદાચતુઃષષ્ટિઃ

## Document Information

Text title : shAradAchatuHShaShTiH

File name : shAradAchatuHShaShTiH.itx

Category : devii, sachchidAnanda-shivAbhinava-nRisiMhabhAratI, devI, sarasvatI

Location : doc_devii

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran

Latest update : November 9, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીશારદાચતુઃષષ્ટિઃ

અદ્રાક્ષમવ્યાજકૃપામપારાં શ્રીશારદામ્બાભિધયા લસન્તીમ્ ।
શ્રીશૃઙ્ગપુર્યામધિચક્રમધ્યમિતઃ પરં કિં કરણીયમસ્તિ ॥ ૧॥

અદ્રાક્ષમમ્ભોજભવસ્ય પુણ્યપરમ્પરામાશ્રિતદિવ્યમૂર્તિમ્ ।
માલાસુધાકુમ્ભલસત્કરાબ્જામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૨॥

અદ્રાક્ષમાનન્દપયોધિરાકાસુધાકરાણામિવ રમ્યપઙ્ક્તિમ્ ।
વિબોધમુદ્રાવરપુસ્તકાઢ્યામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૩॥

અદ્રાક્ષમુત્તુઙ્ગતરઙ્ગતુઙ્ગાતટાન્તરાજદ્વરમન્દિરસ્થામ્ ।
શશાઙ્કબાલોજ્જ્વલદિવ્યમૌલિમિતઃ પરં કિં કરણીયમસ્તિ ॥ ૪॥

અદ્રાક્ષમર્ધેન્દુસમાનફાલાં લાવણ્યસર્વસ્વપયોધિવેલામ્ ।
કીલાલસમ્ભૂતસમુત્થલોલામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૫॥

અદ્રાક્ષમિન્દીવરતુલ્યનેત્રાં ભ્રૂવલ્લિકાનિર્જિતકામચાપામ્ ।
તુઙ્ગાનદીતીરવિહારશીલામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૬॥

અદ્રાક્ષમક્ષ્ણોર્જનિમર્થયુક્તાં પ્રકુર્વતીં સ્વાઙ્ઘ્રિનિરીક્ષણેન ।
પયઃપ્રભૂતપ્રભવસ્ય જાયામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૭॥

અદ્રાક્ષમિક્ષૂદતરઙ્ગતુલ્યાં વાચં નતાનાં દદતીં જવેન ।
લોકેશવામાઙ્કમહદ્વિભૂષામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૮॥

અદ્રાક્ષમાસ્યેન્દુવિલોકનેન વિકાસયન્તીં હૃદયામ્બુજાનિ ।
પ્રણમ્રપઙ્ક્તેર્વચસાં સવિત્રીમિતઃ પરં કિં કરણીયમસ્તિ ॥ ૯॥

અદ્રાક્ષમજ્ઞાનતમઃપ્રચણ્ડમાર્તાણ્ડષણ્ડીકૃતપાદસેવામ્ ।
અપારસચ્ચિત્સુખરૂપદેહામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૧૦॥

અદ્રાક્ષમક્ષીણદયારસાર્દ્રકટાક્ષસંરક્ષિતલોકજાલામ્ ।
અજાન્તરઙ્ગામ્બુજભાનુરૂપામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૧૧॥

અદ્રાક્ષમદ્યાહમશેષલોકપ્રવૃત્તિસાક્ષ્યાત્મતયા વિભાન્તીમ્ ।
ગુપ્ત્યૈ પ્રપઞ્ચસ્ય કૃતાવતારામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૧૨॥

અદ્રાક્ષમત્યન્તવિરક્તિભક્તિશ્રદ્ધાપ્રમુખ્યૈઃ સુગુણૈઃ સુલભ્યામ્ ।
સુદુર્લભાં તદ્ગુણવર્જિતાનામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૧૩॥

અદ્રાક્ષમમ્ભોજભવાબ્જનેત્રગિરીશમુખ્યૈઃ પરિપૂજ્યમાનામ્ ।
વીણાલસત્પાણિસરોજમધ્યામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૧૪॥

અદ્રાક્ષમઙ્ગચ્છવિનિર્જિતેન્દુનીહારહારાવલિદુગ્ધસિન્ધુમ્ ।
સગર્ભયન્તીમગજાસનાથમિતઃ પરં કિં કરણીયમસ્તિ ॥ ૧૫॥

અદ્રાક્ષમાદ્યૈર્વચસાં સમૂહૈરભિષ્ટુતાં દેવમુનીન્દ્રસઙ્ઘૈઃ ।
અમ્ભોજમચ્છં શુકમાદધાનામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૧૬॥

અદ્રાક્ષમાદ્યન્તવિહીનશુદ્ધબુદ્ધસ્વભાવં પરમપ્રમેયમ્ ।
વિબોધયન્તીં કૃપયા પ્રણમ્રાનિતઃ પરં કિં કરણીયમસ્તિ ॥ ૧૭॥

અદ્રાક્ષમહ્નાવહમહ્નવાસમાલોચ્ય વાસં પ્રતિહાય તત્ર ।
ચતુર્મુખાસ્યામ્બુજવાસસક્તામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૧૮॥

અદ્રાક્ષમીશાનરમેશપદ્મભવાદિરૂપેણ જગત્પ્રવૃત્તિમ્ ।
પ્રકુર્વતીં શ‍ૃઙ્ગમહીધરસ્થામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૧૯॥

અદ્રાક્ષમામ્નાયશિરોવચાંસિ હૃદાપ્યલભ્યાં જગદુર્હિ યાં તામ્ ।
વિચિત્રમસ્યાઃ કરુણાવિશેષાદિતઃ પરં કિં કરણીયમસ્તિ ॥ ૨૦॥

અદ્રાક્ષમાયાસવિહીનસેવાલવૈરપિ પ્રીતહૃદમ્બુજાતામ્ ।
અશેષકલ્યાણગુણાભિરામામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૨૧॥

અદ્રાક્ષમાકણ્ઠનતાનુકમ્પામક્ષિપ્રભાનિર્જિતમીનગર્વામ્ ।
વાઙ્માધુરીનિર્જિતકેકિલોકામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૨૨॥

અદ્રાક્ષમૈશ્વર્યમપારમાશુ સમ્પ્રાપયન્તીં પદનમ્રલોકાન્ ।
દન્તચ્છદાધઃકૃતપક્વબિમ્બામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૨૩॥

અદ્રાક્ષમાનમ્રજનાનુતાપવારાશિસંશોષણબાડવાગ્નિમ્ ।
તુઙ્ગાનદીખેલનલોલચિત્તામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૨૪॥

અદ્રાક્ષમાધારસરોરુહસ્થાં પઞ્ચાનનામસ્થિકૃતપ્રતિષ્ઠામ્ ।
મુદ્ગૌદનાસક્તમનોઽમ્બુજાતામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૨૫॥

અદ્રાક્ષમષ્ટાઙ્ગહઠાદિયોગનિબદ્ધભાવૈરનુચિન્ત્યમાનામ્ ।
કષ્ટાદિષડ્વર્ગવિભેદદક્ષામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૨૬॥

અદ્રાક્ષમર્કાયુતભાસમાનામનાહતાખ્યે હૃદયાબ્જમધ્યે ।
ફાલેઽહિશત્રોર્ધનુષઃ સવર્ણામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૨૭॥

અદ્રાક્ષમિન્દોઃ સદૃશીં શિરસ્થસહસ્રપત્રે કમલે મનોજ્ઞે ।
ત્રિકોણમધ્યે વરદીપિકાભામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૨૮॥

અદ્રાક્ષમમ્બાઙ્ઘ્રિસરોજયુગ્મમવોચમપ્યમ્બ તવાભિધાનમ્ ।
અશ્રૌષમંહોહરણં ચરિત્રમિતઃ પરં કિં કરણીયમસ્તિ ॥ ૨૯॥

અદ્રાક્ષમમ્ભોદતમઃસમૂહનીકાશકેશવ્રજશોભમાનામ્ ।
કણ્ઠપ્રભાનિર્જિતકમ્બુગર્વામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૩૦॥

અદ્રાક્ષમવ્યાજદયાસમુદ્રૈર્નૃસિંહભારત્યભિધૈર્યતીન્દ્રૈઃ ।
મોદાચ્ચિરં પૂજિતપાદપદ્મામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૩૧॥

અદ્રાક્ષમીશાનપરાવતારશ્રીશઙ્કરાર્યૈર્વરચક્રરાજે ।
પ્રતિષ્ઠિતાં સર્વજગત્સવિત્રીમિતઃ પરં કિં કરણીયમસ્તિ ॥ ૩૨॥

અદ્રાક્ષમત્યન્તવિરક્તિમાશુ વિશ્રાણયન્તીં વિષયેષુ સુસ્થામ્ ।
શમાદિષટ્કં ચ વિનમ્રપઙ્ક્તેરિતઃ પરં કિં કરણીયમસ્તિ ॥ ૩૩॥

અદ્રાક્ષમાત્મૈક્યવિબોધનેન સંસારવારાકરમધ્યમગ્નાન્ ।
ઉત્તારયન્તીં કરુણાકટાક્ષૈરિતઃ પરં કિં કરણીયમસ્તિ ॥ ૩૪॥

અદ્રાક્ષમશ્વસ્તનનિત્યવસ્તુવિવેકમત્યન્તમુમુક્ષુતાં ચ ।
સમ્પાદયન્તીં પદસન્નતાનામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૩૫॥

અદ્રાક્ષમાકાશનભસ્વદગ્નિજલાદિરૂપાણિ જગન્તિ સૃષ્ટ્વા ।
પ્રવિશ્ય તેષુ પ્રવિભાસમાનામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૩૬॥

અદ્રાક્ષમૂરીકૃતપારહંસ્યૈર્દૂરીકૃતાઙ્ગપ્રભવપ્રસઙ્ગૈઃ ।
વિચાર્યમાણાં શ્રુતિશીર્ષવાગ્ભિરિતઃ પરં કિં કરણીયમસ્તિ ॥ ૩૭॥

અદ્રાક્ષમેનાં હૃદિ મૌનિવર્યૈર્વિશોષયદ્ભિર્વિષયપ્રવાહાન્ ।
સાક્ષાત્કૃતાં પઙ્કજજાતકાન્તામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૪૪॥

અદ્રાક્ષમેતત્પરિદૃશ્યમાનં યદ્દર્શનાન્નીરસમેવ વિશ્વમ્ ।

તાં સચ્ચિદાનન્દઘનસ્વરૂપામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૩૯॥

અદ્રાક્ષમાપૂર્ણકલઙ્કશૂન્યશીતાંશુનીકાશમુખામ્બુજાતામ્ ।
કઞ્જાતસઞ્જાતમનોહરન્તીમિતઃ પરં કિં કરણીયમસ્તિ ॥ ૪૦॥

અદ્રાક્ષમાકર્ણવિશાલનેત્રાં રમ્ભાસમાનોરુયુગાભિરામામ્ ।
નાગેન્દ્રકુમ્ભપ્રતિમસ્તનાઢ્યામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૪૧॥

અદ્રાક્ષમેનાં જડજાતજાતોઽપ્યનેકનાનાવિધવિશ્વકર્તા ।
યત્પાણિપદ્મગ્રહણાદભૂત્તામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૪૨॥

અદ્રાક્ષમેનાં કલિકલ્મષઘ્નીં યત્પાદપદ્મં દિનનાથતુલ્યમ્ ।
સ્વધ્યાતૃહૃદ્ધ્વાન્તનિવારણાત્તામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૪૩॥

અદ્રાક્ષમચ્છાચ્છપયોજસંસ્થાં શરન્નિશાનાથસદૃક્ષચેલામ્ ।
નમ્રાલિજિહ્વાગ્રકૃતપ્રનૃત્તામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૪૪॥

અદ્રાક્ષમવ્યાહતશક્તિદાત્રીં વિનિગ્રહાનુગ્રહયોઃ ક્ષણેન ।
અપીન્દ્રલોકાદિસમસ્તસૃષ્ટ્યામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૪૫॥

અદ્રાક્ષમેનાં મહિષાસુરસ્ય નિશુમ્ભશુમ્ભાસુરયોશ્ચ હન્ત્રીમ્ ।
અસ્વપ્નલોકાવનબદ્ધદીક્ષામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૪૬॥

અદ્રાક્ષમાલોક્ય જનિં સમૃત્યું જાતસ્ય હીત્યાદિ નયેન વવ્રે ।
અજં પતિં યા ચતુરામહં તામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૪૭॥

અદ્રાક્ષમેનાં તરસૈવ નમ્રાન્કુલ્યામિવાયાસલવં વિનૈવ ।
સંસારયન્તીં ભવવારિરાશીમિતઃ પરં કિં કરણીયમસ્તિ ॥ ૪૮॥

અદ્રાક્ષમદ્વૈતવિબોધનાર્થં કણ્ઠેન કમ્બોર્વચસા પિકસ્ય ।
મધ્યેન સિંહ્યા દધતીમભેદમિતઃ પરં કિં કરણીયમસ્તિ ॥ ૪૯॥

અદ્રાક્ષમેનાં દયયા જવેન પ્રકુર્વતીં સ્વાઙ્ઘ્રિસરોજનમ્રાન્ ।
સમ્પન્નસાર્વજ્ઞ્યસમસ્તશક્તીનિતઃ પરં કિં કરણીયમસ્તિ ॥ ૫૦॥

અદ્રાક્ષમગ્રાહ્યનિજસ્વરૂપાં ગૂઢામશેષે કિલ ભૂતવર્ગે ।
ગ્રાહ્યાં સુખેનૈવ સુસૂક્ષ્મધીભિરિતઃ પરં કિં કરણીયમસ્તિ ॥ ૫૧॥

અદ્રાક્ષમક્ષાસુમનોવિભિન્નસચ્ચિત્સુખાકારતયા ગુરૂક્ત્યા ।
અવાપમાનન્દમપાયશૂન્યમિતઃ પરં કિં કરણીયમસ્તિ ॥ ૫૨॥

અદ્રાક્ષમેનાં મુનિભિર્હિ સાહમહં ચ સેતિ વ્યતિહારતો યા ।
વિભાવ્યતે તાં ત્રિજગત્સવિત્રીમિતઃ પરં કિં કરણીયમસ્તિ ॥ ૫૩॥

અદ્રાક્ષમષ્ટાદશસઙ્ખ્યવિદ્યા વશ્યા યદઙ્ઘ્ર્યમ્બુજલગ્નબુદ્ધેઃ ।
તાં સર્વવિદ્યામયદિવ્યદેહામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૫૪॥

અદ્રાક્ષમેનાં પરિહૃત્ય પઞ્ચકોશાન્સુધીભિઃ પરિચિન્ત્યમાનામ્ ।
વેદાન્તસિદ્ધાન્તવિચારશીલૈરિતઃ પરં કિં કરણીયમસ્તિ ॥ ૫૫॥

અદ્રાક્ષમાધારગતત્રિકોણે સન્તપ્તહેમપ્રભલિઙ્ગરૂપામ્ ।
અનાહતાખ્યેઽરુણલિઙ્ગરૂપામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૫૬॥

અદ્રાક્ષમબ્જાયુતકોટિશુક્લલિઙ્ગસ્વરૂપાં કમલે શિરઃસ્થે ।
વાણીમનોજન્મપરસ્વરૂપામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૫૭॥

અદ્રાક્ષમેનાં ગૃહદારપુત્રદેહેષ્વહન્તામમતે જહાતિ ।
યત્પાદપાથોજવિચિન્તનાત્તામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૫૮॥

અદ્રાક્ષમેનાં હરિદન્તજાલવિખ્યાતપાણ્ડિત્યયુતા ભવન્તિ ।
યત્પાદસંસક્તહૃદો મુહુસ્તામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૫૯॥

અદ્રાક્ષમેનાં મદવદ્વિવાદિગર્વેભનિર્વાપણપઞ્ચવક્ત્રાઃ ।
યત્પાદપઙ્કેરુહપૂજકાસ્તામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૬૦॥

અદ્રાક્ષમેનામપિ કિમ્પચાનઃ સુરેન્દ્રતુલ્યઃ પ્રભવેજ્જવેન ।
યન્મન્ત્રજાપાદ્દૃઢભક્તિતસ્તામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૬૧॥

અદ્રાક્ષમમ્લાનસરોજમાલાવિભૂષિતોરઃસ્થલશીર્ષભાગામ્ ।
અમર્ત્યતેજઃસમુદાયરૂપામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૬૨॥

અદ્રાક્ષમઙ્ગપ્રભવપ્રભૂતવ્યથાનભિજ્ઞૈઃ પરિચિન્ત્યમાનામ્ ।
ચિત્તામલત્વપ્રદનૈજચિન્તામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૬૩॥

અદ્રાક્ષમાત્મેષ્ટવરપ્રદાનસન્તોષિતાનેકનતિપ્રધાનામ્ ।
અજાતરૂપામપિ જાતરૂપામિતઃ પરં કિં કરણીયમસ્તિ ॥ ૬૪॥

અદ્રાક્ષં નારદાદ્યૈઃ સુરમુનિનિકરૈર્ગીયમાનાપદાનાં
નૃત્યદ્દિવ્યાઙ્ગનાનાં કરચરણલસત્કઙ્કણાનાં રવૌઘૈઃ ।
સમ્પૂર્ણાશાવકાશાં નવનવકવિતાચાતુરીદાનદક્ષાં
શૃઙ્ગાદ્રૌ ચક્રરાજસ્થિરકૃતનિલયાં શારદાં પારદાભામ્ ॥ ૬૫॥

ઇતિ શ‍ૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતા શ્રીશારદાચતુઃષષ્ટિઃ સમાપ્તા ।

Proofread by PSA Easwaran

*Shri Sharada Chatuhshashtih*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*